# संस्कृतभारती - तेलङ्गाणा

## पत्रालयद्वारा संस्कृतम् – फरवरी –२०२५

## कोविदपरीक्षा

समयः घण्टात्रयम् — दिनाङ्कः २३-२-२०२५

पूर्णाङ्काः १०० — क्रोधि-माघ-कृष्ण-दशमी, भानुवासरः

---

1. अ) समस्तपदं लिखित्वा समासनाम लिखत (षण्णाम्)। ६x१=६

१. मक्षिकाणाम् अभावः
२. कर्म करोति इति
३. आत्मनः अनुचरः
४. पुत्रश्च पौत्रश्च अनयोः समाहारः
५. कुत्सितं कृत्यम्
६. छायाप्रधानः तरुः
७. तप एव धनम्
८. कुसुमानि हस्ते यासां ताः

आ) अधो निर्दिष्टेषु पदेषु षण्णां विग्रहवाक्यानि लिखित्वा समासनाम लिखत। ६x१=६

९. त्रयोविंशतिः
१०. मातृसदृशी
११. सुजनः
१२. कृतभोजनः
१३. विशालापणः
१४. अनुधनम्
१५. प्रयागतीर्थम्
१६. सर्पभयम्

इ) अधोनिर्दिष्टेषु वाक्येषु रेखाङ्कितानि पञ्चपदानि परिष्कुरुत। ५x१=५

१७. तत्पुरुषस्य प्रकारभेदः <u>बहुव्रीहिः</u>
१८. क्त्वा, तुमन्, तव्यत्....एते <u>तद्धितप्रत्ययाः</u>।
१९. वेदस्य <u>पूर्वभागः</u> उपनिषदः
२०. <u>सोमशर्मा</u> इति गौतमस्य अपरं नाम।
२१. उपमानोपमेययोः अभेदः <u>अतिशयोक्त्यलङ्कारः</u>।
२२. वसन्ततिलकावृत्ते <u>एकादश</u> अक्षराणि सन्ति।

ई) विग्रहवाक्यं लिखत। ३x२=६

२३. संस्कृतभाषाप्रचारम्    २४. देवश्रद्धारहिताः    २५. परहितनिरतानाम्

उ) सूक्तिद्वयस्य विवरणं स्वभाषया लिखत। २x१=२

२६. आपत्काले च सम्प्राप्ते यन्मित्रं मित्रमेव तत्।
२७. महीयांसः प्रकृत्या मितभाषिणः।
२८. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

**2.** अ) अधोनिर्दिष्टानां तद्धितान्तानां विग्रहवाक्यानि लिखत। ६x१=६

२९. पार्वती
३०. चक्री
३१. गाङ्गेयः
३२. पौराणिकः
३३. मतिमती
३४. कठिनता

आ) निर्देशानुसारम् उत्तरं लिखत। ६x१=६

**क) णिजन्तरूपाणि लिखत।**

३५. चलति (णिच्, लट् - उ.पु – द्वि.व)
३६. वर्धते (णिच्, लोट् - म.पु. ए.व)

ख) णत्वनिर्णयं कृत्वा रूपाणि लिखत।

३७. पर्वतशब्दस्य षष्ठी-बहुवचनम्।
३८. गृहशब्दस्य प्रथमा-बहुवचनम्

च) तरप् / तमप् प्रत्ययौ उपयुज्य वाक्यानि पूरयत।

३९. काकपिकयोः काकस्वरः .................................. । (कर्कश / मधुर)

४०. व्याकरणग्रन्थेषु पाणिनिव्याकरणं ........................ । ( समग्र )

इ)अधोदत्तानां विवृतवाक्यानां सन्नन्तरूपाणि/ सन्नन्तरूपाणां विवरणवाक्यानि लिखत। ५x१= ५

४१. बुभूषू

४२. सुषुप्सामि

४३. पिपठिषसि

४४. हन्तुमिच्छथः

४५. रक्षितुमिच्छामि

3.अ) गुरुलघुचिह्नम् अङ्कयित्वा गणनाम लिखत (पञ्चानाम्)। ५x१=५

४६. प्राप्नोति

४७. भवति

४८. लेखनी

४९. माधव

५०. क्षन्तव्यः

५१. तितीर्षा

आ) गुरुलघुचिह्नानि अङ्कयित्वा छन्दसः नाम निर्दिशत। १x३=३

५२. प्राबोधयन्नुषसि वाग्भिरुदारवाचः

इ) अधो दत्तेषु वाक्येषु कः अलङ्कारः तस्य कारणं किम् (त्रयाणाम्) ? ३x१=३

५३. माघे मेघे गतं वयः।

५४. पश्य नीलोत्पलद्वन्द्वम्।

५५. तत्र वसुमती नाम सुमती लीलावती।

५६. कुन्ती वचनकुसुमैः श्रीकृष्णम् अर्चितवती।

4.अ) त्रयाणाम् अन्वयार्थं तात्पर्यं च संस्कृतेन लिखत। ३x३=९

५७. मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ॥

५८. सङ्गीतसाहित्यकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम्॥

५९. अधमा धनमिच्छन्ति धनमानौ तु मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम्॥

६०. दूरीकरोति दुरितं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति।
भूतेषु किञ्च करुणां बहुलीकरोति
सत्सङ्गतिः कथय किं न करोति पुंसाम्॥

आ) पद्यद्वयस्य पदविभागम् अन्वयरचनां च लिखत। २x४=८

६१. तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता॥

६२. स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः॥

६३. ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गात् उद्धर्तुमैच्छत् प्रसभोद्धृतारिः॥

5. अ) कः केन किम् अवदत् इति संस्कृतेन लिखत। ६x१=६

६४. हे कल्याणि वीरपुत्रम् आप्नुहि।
६५. मरणचिन्तनं विना स्वशरीरं परिरक्ष।
६६. दिक्पालाः एव वरणीयाः।
६७. अनन्यभाजं पतिम् आप्नुहि।
६८. अपेक्षितं वरं वृणीष्व।
६९. मया तस्य वधः न कर्तव्यः।

आ) संस्कृतेन उत्तरं लिखत (पञ्चानाम्)। ५x१=५

७०. लुप्तोपमा नाम का ?
७१. छन्दसि गुरुवर्णाः के के भवितुमर्हन्ति ?
७२. चम्पूकाव्यं नाम किम् ?
७३. बृहत्कथा कया भाषया रचिता ? केन रचिता ?
७४. शब्दालङ्कारः नाम कः ?
७५. इतिहासशब्दस्य अर्थः कः ?

इ) संयोजयत। (कुण्डल्यां दत्तानि पदानि) ६x१=६

(अश्वघोषः, धनञ्जयः, ब्रह्मगुप्तः, भट्टोजीदीक्षितः, भवभूतिः, सुबन्धुः, क्षेमेन्द्रः)

७६. खण्डखाद्यकम् - सुबन्धुः
७७. दशरूपकम् - धनञ्जयः
७८. बृहत्कथामञ्जरी - भवभूतिः
७९. महावीरचरितम् - ब्रह्मगुप्तः
८०. शारीपुत्रप्रकरणम् - अश्वघोषः
८१. सिद्धान्तकौमुदी - भट्टोजीदीक्षितः

ई) अधो दत्तं विषयम् अधिकृत्य मित्रं प्रति एकं लेखं (पत्रं) लिखत। १x३=३

८२. कृततीर्थयात्रा

उ) अधो दत्तं विषयम् अधिकृत्य संस्कृतेन प्रबन्धं दशवाक्यैः रचयत। १x४=४

८३. धेनुः - तस्याः संरक्षणम्
(स्वरूपम्, प्राशस्त्यम्, औषधगुणाः, गोजिघांसुभ्यः रक्षणम्, अस्माकं कर्तव्यम्)

ऊ) अन्तलिङ्गविभक्तिवचनानि / पदविवरणं लिखत (षण्णाम्)। ६x१=६

८४. अपेक्षितम्
८५. महात्मनाम्
८६. उद्राव्य
८७. उपानयत्
८८. पितरि
८९. माधुर्यम्
९०. आवृत्तेः

******

जयतात् संस्कृतम् – जयतात् भारतम्

*******